# शिक्षामनोविज्ञानम्



डॉ. बि. वेङ्कट लक्ष्मी नारायणः
सहायकाचार्यः, शिक्षाविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
एकलव्यपरिसरः, अगरतला

शिक्षाक्षेत्रे मनोविज्ञानस्य उपयोगिता बहुधा वर्तते। शिक्षायाः मनोविज्ञानस्य च व्यवहारेण सह घनिष्ठसम्बन्धः विद्यते। शिक्षामनोविज्ञानं किञ्चन नवीनं वर्तते यस्य अन्तर्गतम् औपचारिकानौपचारिकरीत्या आयोजिताः शैक्षिकपरिस्थीः तथा च एतासु सम्पत्स्यमानाः शिक्षणाधिगमसंक्रियाः, शिक्षकव्यवहारस्य अधिगमसन्दर्भाणां विषये वर्णनं व्याख्यां भविष्यकथनं नियन्त्रणं च प्रति विशिष्य प्रयासः क्रियते। केनापि शिक्षामनोविज्ञानिकेन शिक्षकस्य शिक्षार्थिनः च मध्ये प्रचाल्यमानायाः अन्तःक्रियायाः प्रकृतेः अपि च तस्य स्तरस्य अध्ययनं क्रियते। तस्य ध्येयं भवति – शिक्षणेन अधिगमेन मूल्याङ्कनेन च सम्बद्धप्रक्रियाणाम् अपेक्षितया सूक्ष्मतया अवधानपूर्वकं च वर्णनम्। अनया दृष्ट्या असौ शिक्षणे अधिगमे मूल्याङ्कने च निहिततत्त्वानां व्याख्यां कृत्वा सम्यक् सम्पादनाय वाञ्छितं नियन्त्रणम् आनेतुं प्रतिमानानां रचनां करोति।।

अत्र शिक्षायाः नवीनधारणानां यथा – **डी- स्कूलिङ्ग** इत्यस्य मुक्तशिक्षायाः पत्राचारशिक्षणस्य विभिन्नशिक्षणप्रणालीनां समागमनेन शिक्षामनोविज्ञानस्य विषयक्षेत्रेषु उद्देश्येषु महत् परिवर्तनम् आगतं वर्तते। एतदतिरिच्य समाजविज्ञाने अर्थशास्त्रे राजनीतिविज्ञाने व्यवहारवादिविज्ञाने भाषाशास्त्रे (शिक्षणे) च प्रयुक्तविधिभिः शिक्षामनोविज्ञानस्य विषयसंरचना अपि च प्रतिपादनपद्धतिः विशेषतया प्रभाविता अभूत्।

अध्यापकस्य कृते इदमावश्यकं यत् छात्राणां विकासात्मकप्रक्रियायाः महत्त्वपूर्णकारकाणि सम्यक्तया जानीयत् शिक्षकः। अर्थात् व्यवहारपरिवर्तनोद्देश्यानां प्राप्तिः मनोविज्ञानस्य विधिसिद्धान्तानां विना ज्ञानं न सम्भवति। मनोविज्ञानेन शिक्षणस्य उत्तमः विधिः कः? छात्रस्य व्यक्तित्वविकासः कथं सम्भवति ? व्यवहारं कथं नियन्त्रयितुं शक्यते ? इत्यादि विषयः ज्ञायते। छात्राणां योग्यता-क्षमता-रुचि-कार्यकुशलतानामनुसारं शैक्षिकप्रगतेः मनोविज्ञानं बहूपकरोति।

शिक्षकाणां द्वारा छात्राणाम् अनगमनार्थं, भविष्यत्कालिकपथप्रदर्शनाय शिक्षकाः स्वयं स्वीयमनोविज्ञानार्थं शिक्षामनोविज्ञानं महदुपकरोति। - स्किन्नर्

एवं शिक्षामनोविज्ञानं शिक्षकैः छात्राणां विकासज्ञानाभिज्ञानाय स्वभावव्यवहारज्ञानाय चारित्र्यनिर्माणाय आवश्यकतानां पूर्तये व्यक्तिगतविभिन्नतानामनगमनाय मूलप्रवृत्तीनां परिशीलनाय सर्वाङ्गीणविकासाय अनुशासनसंरक्षणाय सदुपयुक्तपाठ्यनिर्माणाय समुचितशिक्षविधीनां प्रयोगाय मूल्याङ्कननवीनविधीप्रकल्पनाय उपयुज्यते।

# शिक्षामनोविज्ञानस्य विकासः

यद्यपि शिक्षामनोविज्ञानं विंशतिशताब्द्याः विज्ञानं मन्यते, किन्तु वास्तविकतया प्राच्यभारते शिक्षाप्रदानसमये अनेकानि मनोवैज्ञानिकतत्त्वानि दृष्टिगतानि भवन्ति स्म।

प्राचीनकाले शिक्षकः व्यवहारस्य समस्याभिः अवगतः तासां समस्यानां निवारणमपि सः मनोवैज्ञानिकविधिना करोति स्म। पञ्चतन्त्रस्य कथाः शिक्षायाः मनोवैज्ञानिकपद्धतिं संकेतयन्ति।

शिक्षामनोविज्ञानस्य विकासः अन्यसामाजिकविज्ञानापेक्षया अधिकं नवीनमस्ति, किन्तु अस्य अध्ययनक्षेत्रे अगताः समस्याः आदिकालादेव सन्ति। प्राचीनवैदिकवाङ्मये गुरुशिष्यसम्बन्धस्य, शिक्षाप्रणाल्याः विश्लेषणस्य प्रक्रियां प्रदर्शयन्ति।

शिक्षामनोविज्ञानस्य क्रमिकविकासः ल्पेटोमहोदयस्य समयात् प्राप्यते। अयम् अधिगमस्य क्रियाणां विचाराणां च विकासः भवतीति कथयति। सः शिक्षणे संवादस्य वादविवादस्य अधिकं महत्त्वं ददाति स्म।

तस्यान्तरं अरस्तूमहोदयः ज्ञानेन्द्रियाणां सत्तायामुपरि विश्वासमकरोत्। तदनु दर्शनशास्त्रात् भिन्नो भूत्वा मनोविज्ञानरूपेण व्यापकतामाप्नोत्।

ततः परं विभिन्नशिक्षादार्शनिकाः शिक्षामनोवैज्ञानिकाः मिलित्वा बालकं शिक्षायाः केन्द्रबिन्दुरूपेण संस्थापितवन्तः।

## शिक्षामनोविज्ञानस्योद्देश्यानि

1. बालकस्य स्वभावज्ञानम्।
2. बालकस्य बुद्धेः विकासस्य च ज्ञानम्।
3. बालकेभ्यः वातावरणेन सह सामञ्जस्यं स्थापयितुं सहयोगप्रदानम्।
4. शिक्षायाः स्वरूपेण, उद्देश्येन सह परिचयप्रदानम्।
5. अधिगमस्य विविधैः सिद्धान्तैः विधिभिः च परिचयस्थापनम्।
6. संवेगानां नियन्त्रणं तेषां शैक्षणिकमहत्त्वस्य चाध्ययनम्।
7. चरित्रनिर्माणस्य विविधसिद्धान्तैः सह परिचयः।
8. विद्यालयीयानां विषयाणां ज्ञानस्य मापनविधीनां प्रशिक्षणम्।

# शिक्षामनोविज्ञानस्योद्देश्यानि

9. छात्राणां रुचि-अभिरुचीनां ज्ञानप्राप्तिः।
10. छात्रेषु विद्यमानवैयक्तिकभिन्नतानामध्ययनम्।
11. छात्राणाम् अधिगमप्रक्रियायाः एवम् अध्ययनप्रक्रियायाः अभिज्ञानम्।
12. शिक्षणसामग्र्याः तथा अधिगमसामग्र्याः निर्माणम्।
13. शिक्षामनोविज्ञानसिद्धान्तानां ज्ञानाय प्रयुक्तविधीनां ज्ञानप्रदानम्।
14. छात्राणां योग्यता-क्षमता-सामर्थ्यादीनां ज्ञानप्राप्तिः।
15. छात्राणां विशिष्टव्यवहारस्य अध्ययनम्।
16. शैक्षिकसमस्यानामध्ययनम्।
17. विशिष्टबालकेभ्यः शिक्षाप्रदाने सरलतासम्पादनम्।


# शिक्षामनोविज्ञानस्य क्षेत्रम्

1. अधिगमः (LEARNING)
2. अधिगन्ता (Learner)
3. शिक्षकः (Teacher)
4. शिक्षणम् (Teaching)
5. शिक्षणाधिगमपरिवेष (Teaching Learning Environment)
6. मानवविकासः (Human Development)
7. शिक्षणविधयः (Methods of Study)
8. मूल्याङ्कनम् (Evaluation)

1. वंशानुक्रमः (Heredity)
2. विकासः (Development)
3. वैयक्तिकभिन्नता (Individual Differences)
4. व्यक्तित्वम् (Personality)
5. विशिष्टबालकः (Exceptional Child)
6. अधिगमप्रक्रिया (Learning Process)
7. पाठ्यक्रमनिर्माण (Curriculum Development)
8. मानसिकस्वस्थता (Mental Health)
9. शिक्षणविधयः (Teaching Methods)
10. निर्देशनं परामर्शश्च (Guidance and Counselling)
11. मापन एवं मूल्यांकन (Measurement and Evaluation)
12. समूहिकगतिशीलता (Group Dynamics)
13. अनुसन्धानम् (Research)
14. किशोरावस्था (Adolescence)



डॉ. बि.वि.लक्ष्मीनारायणः


Scope of Educational Psychology
Learner
Learning Process
Learning Situation & Strategies
Development
Stages
Individual Difference
Personality
Theories
Measurement
Needs
Aspects
Factors
Intelligence
Aptitude
Disability
Creativity
Curriculum Transfer
Modals
Methods
Evaluation
Personal Assessment
Academic Achievement
Guidance & Counselling
Educational
Personal
Vocational
Management
Macro
Micro
Acquisition
Retention
Transaction
Theories and Factors

# शिक्षामनोविज्ञानस्य परिधिः

## (The Boundary of Educational Psychology)

- शिक्षामनोविज्ञानस्य उद्देश्यानां तस्य विषवस्तुनः च विवेचनाधारेण तस्य सीमारेखायाः परिधेः च सम्बन्धे पूर्वाभासः जायते। ज्ञातव्यं यत् मौलिकानां व्यवहृतानाञ्च अनुसन्धानानां माध्यमेन अस्य ज्ञानक्षेत्रे परिवर्तनं जायमानं वर्तते। एतदतिरिच्य शिक्षायाः धारणानां व्यवहारविज्ञाने विकसितानां नवीनानां सम्प्रत्ययानाम् अनुसन्धानानाञ्च नवीनविधीनां साहाय्येन न केवलं शिक्षामनोविज्ञानस्य विषयवस्तुषु अपि तु अस्य सीमारेखायाम् अपि विस्तरः अवश्यम्भावी वर्तते।
- बी.क्लॉड-मैथिसमहोदयेन तथा च अन्यैः लैखकैः 1977 तमे वर्षे कस्यचित् लेखस्य माध्यमेन शिक्षामनोविज्ञानस्य परिधिविषये एवमुल्लिखितम् -
- शिक्षामनोविज्ञानम् = व्यवहारवादीविज्ञानम् x शैक्षिकप्रक्रिया x अध्ययनविधेः विषयवस्तु इति।
- अस्य समीकरणानुसारं शिक्षामनोविज्ञानस्य परिदेः निर्धारणं व्यवहारवादि-विज्ञानस्य (behavioural science) अधुना संज्ञानवादिमनोविज्ञानस्य च विषयवस्तुनः शैक्षिकप्रक्रियायाः (educational process) तथा च अध्ययनविधेः (method of enquiry) अन्तःक्रियाया भवति। एतेषु त्रिषु क्षेत्रेषु विकसितनवीनविज्ञानस्य विधेः एकञ्च परिप्रेक्ष्यस्य यत्र परस्परं प्रभावः जायते, तत्रैव अपरस्मिन् पार्श्वे शिक्षामनोविज्ञानस्य अध्ययनक्षेत्रे एवञ्च तस्य सीमारेखायामपि परिवर्तनं भवति।


# शिक्षामनोविज्ञानस्य महत्त्वम्

- पाठ्यक्रमस्य निर्माणम्।
- बालकेन्द्रितशिक्षा
- शिक्षणाधिगमपद्धतीनामम् उपकरणानां च चयनम्।
- शिक्षाप्रक्रियाया: अवगमनम्।
- अध्येतु: अवगमनम्।
- विशिष्टबालकानाम् अभिज्ञानम्
- पाठ्यसहगामिक्रिया:
- अनुशासनम्
- समयसारिणी
- शिक्षाया: उद्देश्यानां प्राप्तौ साधक:
- वैयक्तिकभेदानामुपरि बलम्

# शिक्षामनोविज्ञानस्य अध्ययनपद्धतयः

शिक्षामनोविज्ञानं मनोविज्ञाने स्वतन्त्रशाखारूपेण संस्थापितं वर्तते। शिक्षणस्य अधिगमस्य च परिस्थितिषु प्रक्रियासु स्तराणाञ्च विषये वस्तुनिष्ठं व्यवस्थितं च वर्णनं, व्याख्याकरणं भविष्यकथनं च विज्ञानस्यास्य मुख्यं ध्येयं वर्तते। अस्माभिः स्मरणीयं भवति यत् शिक्षणाधिगमयोः इमाः परिस्थितयः औपचारिक-अनौपचारिकरूपेण च प्रदीयमानया शिक्षया युक्ताः भवितुं शक्नुवन्ति। अत्र एतासाम् अध्ययनाय कतिपयप्रणालीनाम्/पद्धतीनाम् प्रयोगमाश्रयन्ति। मनोविज्ञानस् शिक्षामनोविज्ञानस्य पद्धतयः समानाः एव वर्तन्ते। ताः द्विधा विभक्ताः यथा –

1. **निरीक्षणपद्धतयः** (Methods of Observation)
    1. अन्तर्दर्शनपद्धतिः
    2. बहिर्दर्शनपद्धतिः
    3. प्रयोगात्मकपद्धतिः
2. **विवरणात्मकपद्धतयः** (Methods of Exposition)
    1. व्यक्तिवृत्ताध्ययनपद्धतिः
    2. निदानात्मकपद्धतिः
    3. तुलनात्मकपद्धतिः
    4. विकासात्मकपद्धतिः
    5. मनोविश्लेषणात्मकपद्धतिः
    6. सांख्यिकीयपद्धतिः
    7. मनोभौतिकीयपद्धतिः






डॉ. बि.वि.लक्ष्मीनारायणः

# शिक्षामनोविज्ञानस्य अध्ययनपद्धतयः

1. अन्तर्निरीक्षणपद्धतिः
2. निरीक्षणपद्धतिः
3. व्यक्तिवृत्ताध्ययनपद्धतिः
4. प्रायोगिकपद्धतिः
5. चिकित्सापद्धतिः/उपचारात्मकपद्धतिः